No. ४४४२

Title हौत्रक परिशिष्ट भाष्यं

Author कात्यायनः व कर्कः

Extent २३ Age

Subject छन्द पद्धति परिशिष्टं

लौगाक्षिपरिशिष्टभाष्यम्

४४४२

२३८

[illegible]

डौ त्रिकटीव

॥ ॥श्रीगणेशाय नमः॥ ॥यजुर्वेदसमधीतमाध्वर्यवमभिहितं इदानीं तदधीतमेव हौत्र
१ मभिधेयं। तदध्ययनं हि कस्मात् बाहेत्येवमादिदर्शपूर्णमासप्रकरणे अधीतं। ततश्चात
हिकारेष्वपीष्टिपशुबंधेषु प्रवर्त्तते। यद्यपि तत्र ऋग्वेदिकं हौत्रमस्त्येव। तथापि यजुर्वेदि
कहौत्रमपि श्रूयते॥ यत् ऋग्वेदेनैव हौत्रं कुर्वीतेति तदपि यजुर्वेदिकस्याम्नातत्वा
न्निषेधेन समर्थस्तत्र नैव भविष्यति। तस्माद्दर्शपूर्णमासादौ विकल्पः सर्वत्र। सौत्रामण्यां
पुनरार्ग्वेदिकं नास्त्येवेष्टकापशौ च। अतस्तत्रैटा यजुर्वैदिकमेव। एवं च सति याजुर्वैदिकत्वा
त्तद्विनाशे याजुर्वैदिकमेव प्रायश्चित्तं भवति। अतः सूत्रोपन्यासः॥ छ॥ हौत्रं करिष्यंत्संव
रेण प्रविश्यापरेणाहवनीयं प्राङ्तिष्ठन्नध्वर्युप्रेषि तो ब्रह्मन्त्साभिधेनीरनुवक्ष्यामीत्यु
क्त्वा तस्मात्प्रसवमाकांक्षेत्॥ संचरः प्रणीतोत्करावंतरेण चात्वालोत्करावंतरेणेति न राम बार
प्रविश्याहवनीयमपरेण प्राङ्तिष्ठन्नध्वर्युप्रेषितोऽग्नये समिध्यमानायानुब्रूहीत्येवं। ब्रह्म १

त्सामिधेनीरनुवक्ष्यामीत्यक्रान्तेनो ब्रह्मणः प्रसवमाकांक्षेत्। प्रसवस्त्वमिहितः इष्टिसूत्रे॥ ७॥
ब्रह्मप्रसूतोऽंगुलिपर्वाग्रमा० ससट० हितं० हृदयदेशेंजलिं प्रतिष्ठाप्य दक्षिणं च पादं वे
दाः श्रोणिसमं कृत्वा द्यावापृथिव्योरंतरमीक्षमाणो नमः कंदं जपेत्। ब्रह्मानुज्ञातः अंगु
लिपर्वाग्रमा० ससट० हितं अंजलिं हृदयदेशे कृत्वा दक्षिणं पादं वेदिश्रोणिसंलग्नं कृत्वा
द्यावापृथिव्योरंतरमीक्षमाणो नमः कंदं जपेत्॥ नमः प्रवक्त्र इत्येवमादि नमः कंदः भूर्भु
वस्स्वः इत्येवमंतं॥ ७॥ त्रिर्हिंकृत्योपा० सुमहाव्याहृतीः पूर्वाः सामिधेनीः प्रणवेनार्धर्च
शः संदध्यात्। उपा० सुत्रिर्हिंकृत्य महाव्याहृतिः पूर्वाः ॐ सर्वाश्च सामिधेनीरन्वाह इति शेषः
। तत्र च प्रणवेन कर्त्तव्यानं कुर्यात्॥ ७॥ अन्यत्राप्यर्धर्चेवसायेत्॥ अन्यत्रापि सगणेश्वग्नि
मंथनादिष्वर्धर्चेवसानं कुर्यात्। इदानीं सामिधेनीरन्वाह॥ प्रवो वाजा इत्येवमादि अग्ना
जुहोता दुवस्यताग्निं प्रयत्यध्वरे॥ वृणीध्व० हव्यवाहनमित्येवमंता एकादश सामिधेनी

रनुब्रूयात्॥५॥त्रिः प्रथमां त्रिरुत्तमां ताः पञ्चदश भवन्तीत्येवम्प्रगाणोऽनुवचनं त्रिः प्रथमोत्तमे अनु
२ ब्रूयात्॥६॥अग्ने महां असि ब्राह्मण भारतेत्यपसंततनोत्यार्षेयं यथा दि॥अग्ने महां ३ असि
ब्राह्मण भारतेत्यंतं मंत्रं वाचं अग्ने त्वया सामिधेन्यापसंततं स्यार्षेयं यथा दिग्ननु ब्रूयात्॥आ
दितस्मारभ्य इदं०॰ह्विर्पितेवाग्रेथ पुत्रोऽथ पौत्र इति मकृतत्वात्॥८॥देवेद्ध इत्येवमाद्यित्वरां इ
इवाग्नेने मिर्देवांस्त्वं परिभूरस्या वह देवान्यजमानायेत्येवमंतं संततमनु ब्रूयात्॥पंचद
शवा निविदः संपादयन्ननु ब्रूयादिति विशेषः॥पंचदश निवित्पदानि कृत्वा ह देवेद्ध
इत्येवमादि सामिधेन्यनुवचनं घोषं इध्मानुवचनात्॥ततश्च तदभावेन भवति॥अथा
वाहनं॥१०॥यथा देवतमग्निमग्न आ ३ वह सोममा वह त्वा जभागदेवतयोः॥आवाहनमि
तिशेषः॥११॥देवां ३ आ ज्यपां ३ आ वह स्तुयजा चयजेत्येवमंतं स्वरं॥इति संज्ञा कव हा राम
रार्थ्या॥१२॥आज्यभागस्विष्टकृदंतरे भीज्यानामावापः॥आज्यभागस्विष्टकृतोर्यदंतरं तत्र २

हीज्यानांदेवतानामावापः। आवपनमावापः। अन्तेपड्स्पर्धः॥ छ॥ निगमनमावाहनउत्तमे
प्रयाजेस्विष्टकृतिसूक्तवाकेच॥ निगमनमभीज्यमानदेवतानाभिधानं तदावाहनेक
र्त्तव्यं। तथोत्तमेप्रयाजेस्विष्टकृतिसूक्तवाकेच। इयांस्तुविशेषः। आवाहनेउत्तमेप्रया
जेद्वितीयांतेन। स्विष्टकृतिषष्ठ्यंतेनसूक्तवाकेप्रथमांतेन॥ छ॥ अव्यवहितासमानदेव
ताः सकृदावाहयेत्। यास्त्वव्यवहितासमानदेवतास्तासांसकृदेवनिगमनं। यथात्रै
वसाग्नेयऐंद्रस्यमाहेंद्रस्यवा। आवाहयेदितिनिगमनोपलक्षणं॥ छ॥ अनीज्यंचव्यव
हिताः देवतांतरव्यवधानेतुसमनीप्रनीज्यमानावाहनादिगमनं॥ छ॥ वाजिनेनावाहय
ति। वचनात्॥ पशुपुरोडाशंचानन्यदेवत्यं। नावाहयन्तीतिवर्त्तते। अनन्यदेवतत्वादावा
हितैवासौदेवतेति॥ अन्यदेवत्येपुरोडाशेतद्देवतावाहनंकर्त्तव्यमेव। यथासौत्रामण्या
मिष्टकापशौच॥ छ॥ यानिचान्वापतंते। उत्तरप्रयक्ष्ट्रियान्यागाःक्वतिति अन्वायन्तीति

पंचनावाहनं।।यथासवित्रादीनां।। ॰ ।।अन्वायतीनामयाङ्करणजोषणानिनिवर्त्तंते।तच्चन
२ सामर्थ्यात्।अयाङ्करणजोषणग्रहणंचोपलक्षणं।।न्यायस्यतुल्यत्वात्।।ततश्चोन्नमेअ
यानेपिनभवति।। ॰ ।।मानुषइतिःकत्वेतत्त्वेस्येवमानिवृत्तजपइत्येवमतंस्त्रे।।यदाव
र्युणाभिहितःअसौमानुषइतितदाएतत्वादेवसवितरित्येवमादिततजपः।।अस्य
वरणाभावेक्रमावः।। ॰ ।।वएमोवीरःहस्तस्पृक्त्वित्यनेनमंत्रेणात्मानमालभते।अयंच
वरणाभावेपिभवतिहोतृसंस्कारः।। ॰ ।।इंद्रमन्वारभामहइत्यनेनमंत्रेणदक्षिणयोरः
सयोरध्वर्युमग्नीध्रंचसंस्पृशति।। ॰ ।।संत्रहनान्यादायतैःसमार्ष्टिमुखंत्रिःप्रदक्षिणांसम्मा
र्ष्टिसंमाअनयापशुभिर्ब्रह्मवर्चसेनचमृड्डीत्यनेनमंत्रेण।। ॰ ।।अपमार्गोस्यपमापा
र्मनापापेनचमृड्डीत्यनेनमंत्रेणमुखंत्रिरेवाप्रदक्षिणांसंमार्ष्टि।। ॰ ।।अपउपस्पृश्यऐंद्री राम
मावृतमन्वावर्त्तइत्यावृत्प्रदक्षिणां।। ॰ ।।होतृषदनात्तृणमंगुष्ठोपकनिष्ठिकाभ्यामाद। २

यद्दक्षिणापरस्यांदिशिनिरस्येत्।निरस्तःपरावसुःसहतेनयंद्विष्मइत्यनेनमंत्रेण।आचार्यवर्जनत्वेन
निरसनेऽप्यवभृथेनभवतः॥उपवेशनशेषत्वात्।उदकमुपस्पृश्यऐंद्रीमावृतमित्यावृत्य
प्रदक्षिणं।प्रदक्षिणग्रहणान्नेतरथावृत्तिः॥छ॥इदमहमर्वावसोःसदनेसीदामीत्युपविश्य
जपन्नुविश्वकर्मस्त्वनुपाञ्चसिमामामोदोषिष्टंमामाहिं॰।सिष्टमेषवोल्लोकइत्युदङ्ङेजेत।इदम
हमित्यनेनमंत्रेणहोतृषदनेउपविश्यजपन्नुविश्वकर्मस्त्वन्नुपाञ्चसिइत्यनेनमंत्रेणोदंगच्छे
त्।एजनिर्गत्यर्थः।अयंचानुपवेशनशेषत्वादवभृथेऽपिनभवति॥छ॥अग्नीमीत्रमाणोत
पेक्षिन्वेदेवाशास्तइति।अयंचपदार्थत्वाद्यावदुक्तेनभवति॥छ॥अग्निहोमेत्यनेनस्रुगादा
पनस्यसाधकत्वेयजमानदेवनेत्येवमंतंतुचैरुक्ता॥छ॥शनैर्योग्नि॰होतारमत्रेत्याह॥छ॥
प्रवृत्तजपादीतिस्रा च्छस्रुगादापनात्।शनैरेवयत्तवतीमित्येतदपिस्रुगादापनेनचैरध्वर्यु
चोदनान्नपंचप्रयाजाः।इज्यंतइतिशेषः।यजयजेत्येवमध्वर्युणाचोदितेपंचप्रयाजाः

जति॥ समिधः समिद्धो अग्न आज्यस्य व्यन्त्वित्येवमादिभिः॥ वसिष्ठशुनकवध्र्यश्व संकृतिराजन्य
४ वैश्यकण्वात्रिकश्यपप्रजाकामपशुकामानां द्वितीयो नराशंसः। तनूनपादन्येषां। वसि
ष्ठादीनां नराशंसो द्वितीयः प्रयाजो भवति। अन्येषां तनूनपाद्द्वितीयः॥ छ॥ वार्त्रघ्नावाज्य
भागावग्निर्वृत्राणि जंघनदग्निराज्यस्य वेत्वित्याग्नेयस्य याज्यानुवाक्ये॥ त्वं सोमासि
सत्पतिरित्यनुवाक्या। जुषाणः सोम आज्यस्य हविषो वेत्विति याज्या सौम्यस्य॥ वृत्रहन्
मल्लिंगानुवचने वार्त्रघ्नावुच्येते। वार्त्रघ्नाविति संव्यवहारार्था संज्ञा। वार्त्रघ्नावाज्यभागा
वनादेशे। इत्येवमाद्यर्था॥ छ॥ विराजौ संयाज्ये प्रेद्धो अग्न इमो अग्न इति॥ संयाज्याशब्देन
स्विष्टकृतो याज्यानुवाक्ये अभिधीयेते॥ इयमपि च संज्ञा संव्यवहारार्थैव॥ छ॥ स्विष्ट
कृन्निगदः प्रागपान्त्यायाः अयाडग्निरग्नेः प्रियाधामानीत्येवमादिभिः पश्चात्तैर्देवतापदैः॥ राम
४॥ अंक्तेंगुलिपर्वणी ओष्ठयोर्निलिंपेत॥ छ॥ मनसस्पतिनातेहुतस्याश्नामीषे प्राणायेति ४

अधरमोष्ठमधरेणपर्वणा ॥ छ ॥ वाचस्पतिनातेकृतस्याग्नेतिउत्तरमोष्ठमुत्तरेण पर्वणा ॥ छ ॥
अवजिघ्रेदिस्येके ॥ सचायंविकल्पः तुल्यशास्त्रत्वात् ॥ छ ॥ हस्ततलेऽवांतरेडामादत्ते ॥
उर्जंचप्रतिगृह्णाङ्गुलिभिरप्रसारिताभिरङ्गुष्ठीकृताभिर्मुखमात्रेधारयन्जपेत् ॥ उप
हूतः रथंतरमित्येवमादिउपहूतोग्निरुपहूत इत्येवमंतं ॥ शनैरवांतरेडामुपहूयोच्चैरि
डामुपहूयते ॥ इडोपहूतो पहूतेत्येवमादिहविर्जुषंतामितितस्मिन्नुपहूतइत्येवमंतं ॥
चतुःकृत्वश्चविरामः प्रतिवाक्यं ॥ छ ॥ अथानुयाजाः देवंबर्हिरित्येवमादिभिर्याज्या
भिरुक्तमेत्यनवानंयजेत् ॥ छ ॥ सकृद्धावान्यादमकं नेत्यत्र ॥ सर्वैसकृदवान्यादितिस्मृ
तेः ॥ सूक्तवाकायसूक्ताब्रूहीत्युक्ते सूक्तवाकंप्रतिपद्यते ॥ इदंद्यावापृथिवीत्येवमा
दि ॥ अत्रचाज्यभागदेवतानांसकीर्तनोत्तरकालेप्रधानदेवताः संकीर्त्यंते ॥ छ ॥ आशा
स्तेयंयजमानोसावितियजमाननामग्रहणं ॥ छ ॥ नाम्नोऽवेदनेयजमानकामइतिब्रूयात् ॥

५ यज्ञकामइतिसूत्रितत्वात्॥ ॐ॥शंयोर्ब्रूहीत्युक्तेशंयोर्वाकंप्रतिपद्यते॥तच्छंयोरावृणीम
हइत्येवमादि।अर्थवत्कर्मचेतत्॥ननत्वयावद्धुक्तेनिवर्त्तते।इष्टदेवतासंकीर्त्तना
र्थत्वाद्यावद्धुक्तांतापच्छिन्नेषुसूक्तवाकःप्रवर्त्ततएव॥ॐ॥अनयेतिप्रादेशंवेदिश्रोणे
निदधाति।अयान्तयेत्स्फ्यपस्पृशतीतिस्कन्नत्वात्।अर्थकर्मचेत्।ननत्वयावद्धुक्तां
तापच्छिन्नेषुनिवर्त्तते॥ॐ॥जघनेनगार्हपत्यमुपविश्यचत्वारःपत्नीसंयाजाःइज्यंत
इतिसूत्रशेषः॥ॐ॥आप्यायस्वसमेतुइतिसोमस्यप्याज्यानुवाक्ये॥ॐ॥इहत्वष्टारम
ग्रियंतनःस्तुरीपमितित्वाष्ट्रस्य॥ॐ॥देवानांपत्नीरुशतीरवन्तुनस्त्रावंतुदेवपत्नीतिदेवानां
पत्नीनां॥ॐ॥अग्निर्होतागृहपतिःहव्यवाडग्निरजरइत्यग्नेर्गृहपतेः॥ॐ॥सर्ववदिज्यं
नंचेदत्रेज्यंतंकुर्यात्॥ॐ॥यजमानस्यानेपत्नीविशेषःइज्यंतेचेत्।पत्नीसंयाजकर्मसु राम
र्ववदिज्याकार्या॥यजमानस्यानेउपहूतेयंपत्नीतिविशेषः।द्विपत्नीकेउपहूतेमेपत्न्यौ ५

5
अनयाकृतिरिष्टि
कयाइतिकाएव

बिकूपलीके उपकूलाइमाः पल्पः॥ छ ॥ शेषंतत्वेन्पूर्ववक्छयोर्वाकः॥ अत्र चशंयोरुत्वपद विभा
षा॥ इजंतंभवत्येव॥ छ ॥ सर्वेषुसमिधमाधायाहवनीयेयथेतंतनिःक्रामेत्॥ सर्वेषुभि बा
मुहोनासमिधमाधायआहवनीयएववायेनैवप्रविष्टस्तेनैवनिःक्रामेदित्यर्थः॥१४॥
अथातोदर्शपूर्णमासयोर्याज्यानुवाक्याः॥ वांबोस्पतइतिशेषः॥ मासेतावङक्कावाज वारक्षा ४
भागौसंयाज्येच॥ छ ॥ अग्निमूर्द्धाभुवनोयत्तस्पेसामेयस्पयाज्यानुवाक्ये॥ छ ॥ अग्नीषो
माविमं॰ सुमेअरुणतमित्यनुवाक्या॥ छ ॥ जुषाणावस्नीषोमावाज्यस्यमित्यपा॰ अनु
याजस्य॥ याज्या॥ छ ॥ अग्नीषोमासवेदसेत्यनुवाक्या॥ युवमेतानिदिविरोचनानीति
याज्या॥ अग्नीषोमीयस्य॥ ११ ॥ दर्शेत्वंधन्त्वनावाज्यभागौ॥ भवतइतिशेषः॥ छ ॥ अग्निःप्रत्ने
नमन्मनेत्याग्नेयस्यानुवाक्या॥ छ ॥ सोमगीर्भिष्ट्वेतिसोम्य [illegible] स्यानुवाक्या॥ याज्येतु
पौर्णमासवत्॥ छ ॥ उक्तंचाग्नेयस्योपा॰ अनुयाजस्यच॥ याज्यानुवाक्ये॥ छ ॥ वेदस्यवर्षे

दिदंविष्णुः प्रतद्विष्णुरितिवैष्णवश्चेड्उपा०ंशुयाजस्यादिदंविष्णुरित्यनुवाक्याप्रतद्विष्णुरिति
६ याज्या॥छ॥इन्द्राग्नीअवसागतमस्मभ्यंमित्यनुवाक्या॥गीर्भिर्विप्रः प्रमतिमिच्छमानइ
तियाज्या॥ऐंद्राग्नस्य॥छ॥त्रिष्टुभावृतवत्यौसंयाज्ये।संयाज्येत्रिष्टुप्शुक्रंदसीस्तनुलि
गवत्यौचस्विष्टकृतोयाज्यानुवाक्ये॥त्याहृ॥छ॥पिप्रीहिदेवांउशतोयविष्ठेत्यनुवाक्या।
6 अग्नेयदद्यविशोअध्वरस्यइतियाज्या॥१२॥छ॥उपा०ंशुयाजस्योपा०ंशुयाज्यानुवाक्यावा
जुषतावीवृधतांकृतेतिचाउपा०ंशुदेवतापदंयाम्यानुवाक्येचातत्संबंधंजुषतावीवृधता
कृतेतिचोपा०ंशु॥छ॥उच्चैरन्यत्॥संबंधमध्यकृपांशुप्रयोगिणीनांचैवं॥अन्या।अपियाउ
पा०ंशुप्रयोगिण्यदेवतास्तासामप्येवं॥छ॥आवयदाददद्घसत्करत्अग्रभीदवीवृधेति
च॥पशोयथामंत्रवचनं।उपा०ंश्वेव।आवयत्।आददत्।घसत्करत्अग्रभीत्अवीवृ राम
धत्इतिचपशौचपथामंत्रवचनमुपा०ंश्वेव॥ ॥छ॥इत्युपाध्यायकृतौकर्कहोत्रभाष्ये ६

प्रथमोऽध्यायः॥ नित्ये दर्शपूर्णमासतंत्रे ग्न्याधेयस्य पुनराधेयस्य प्रायश्चित्तेष्टीनामाग्रयणस्याचा
तुर्मास्यानां पशुबंधानां सोमानां रौद्र्यायां चानुपूर्वेण होत्रिके विकारान्वक्ष्यामः॥ दर्शपौर्ण
मासिके सर्वत्र नित्यं व्यवस्थिते तंत्रे हौत्रिके ये विशेषाः नान्वस्यामइति प्रतिज्ञातं तेना॥ ७॥
आवाहये त्विति आमये यजेत्संयजेज्जोषये दिति च यथाऽऽनंतर्यं॥ आवाहये यथाऽऽनंतर्यं। यः
थाम्नातक्रमेणेत्यर्थः॥ निगमये दितिस्वाहाकृति निगमन उच्यते। यथाऽऽनंतर्यमित्यनंतरत्रा
प्यनुवर्त्तते॥ यजे दितियागाभिधानं॥ संयजे दितिलक्षणाया स्विष्टकृद्याद्यपद्धरण उच्यते।
जोषये दिति सूक्तवाकनिगमनं॥ तत्र यजुष्येति शब्दः॥ ७॥ उच्चै रूपाट्फ्लुतायाः सर्वत्रो
पस्मरेत्त॥ सर्वत्र निगमनेषु यदुपाट्फ्लुतायाऽउपस्मरणं तदुच्चैरेव कर्त्तव्यं। न उपाट्शुध
र्मवत्त। तदेकवाक्यतयोपस्मरणस्यापि कपाट्फ्लुत्वं माभूदिति॥ उच्चैरुच्यते॥ स्मरणस्य यत्स
मीपे तदुपस्मरणं॥ यथाऽऽवह स्वाहा प्रियाधामानीदं हविरिति च॥ ७॥ चात्रैवावान्यभा

गावनादेशे॥ भवत इति सूत्रशेषः॥ छ॥ अग्न आयूं॰ ष्यग्ने पवस्वेति प्रथमस्य हविषो याज्यानु
७ वाक्ये। आधानस्य प्रथमहविषो याज्यानुवाक्ये॥ छ॥ गायत्र्यावीडितवत्यौ संयाज्ये। गा
यत्र्यौ क्षंदसी ईडितवत्यौ तद्विंगवत्यौ॥ छ॥ अग्निमीडे पुरोहितमित्यनुवाक्या। तंत्वामज्मे
घुवाजिनमितियाज्या॥ छ॥ १॥ छ॥ द्वितीयायां वृधन्वंतावाज्यभागौ॥ अग्न्याधेये द्विती
यायामिष्टौ वृधन्वंतावाज्यभागौ॥ छ॥ अग्ने पावक रोचिषा॥ स नः पावक दीदिव हवि
षः। याज्यानुवाक्ये॥ छ॥ अग्निः शुचिव्रततमः उदग्ने शुचय इति द्वितीयस्य। हविषो याज्यानु
वाक्ये॥ छ॥ ह्यग्निवत्यौ संयाज्ये। अग्निहव्यवत्यौ संयाज्ये भवतः तिस्र आह॥ छ॥ अग्निनाग्निः
।त्व॰ ष्यग्ने त्वमग्निनेति स्विष्टकृतो याज्यानुवाक्ये॥ २॥ छ॥ तृतीयायां॰ सप्तदश सामिधे
न्यः अग्न्याधेय एव तृतीयामिष्टौ सप्तदश सामिधेन्यो भवंति॥ छ॥ समिध्यमानसमिद्ध राम
वत्यावंतरेण पृथक्पाजवत्यौ दधाति। समिध्यमानो अध्वरे समिद्धो अग्न आहुतेति चान ७

योरंतराले एष्टुपाजा अमर्त्यः त८ सवाधोयतस्क चइति द्वे वाय्येदधाति ॥ ७ ॥ वित्तं न्वं तावा
ज्यभागो ॥ त्वमग्ने सप्रथा असि ॥ सोमयास्ते मयो भुवऊतयः संतिदाशुषइति चाज्यभागयोरनु
वाक्ये ॥ ७ ॥ सुत्रामाणं महीमूषुमातरमित्यादित्यस्य याज्यानुवाक्ये ॥ ७ ॥ विराजो संयाज्ये
एवा ॥ ७ ॥ आग्नेयमेवेत् त्वामग्ने पुष्करादधामग्निः सहस्त्रिणाद्निह विषः आग्नेयश्चेत्के व
लो भवति ॥ त्वामग्ने पुष्कराद्यमग्निसहस्त्रिणद्निह विषो याज्यानुवाके भवतः ॥ ७ ॥ अ
ग्निं स्तृतम धिरः सोमनेति संयाज्ये ॥ भवतः ॥ सर्वत्र गायत्रीभिरनवानं वषट्करोति विराड्भ्व
ज्या संयाज्ये ॥ सार्वत्रिको यं धर्म उच्यते ॥ गायत्रीभिरनवानं वषट्कुर्यात् ॥ विराजौ संयाज्ये ॥
हैव चमुक्कमग्न्याधेयादीनां ॥ पुनराधेयउच्यते ॥ तदर्थमाह ॥ ३ ॥ पुनराधेये सर्वमाग्नेयं ॥
प्रयाजानुयाजादि ॥ एवं हि श्रूयते ॥ प्रयाजान्नवृत्य ॥ सत्रा श्राव्याह समिधो यजेत्या
ग्नेयमेवमङ्क्पं परोक्षमिव त्वग्नीन्यजेतिहैव तत्र ब्रूयात् ॥ अथानुयाजेषु देवान्यजेत्याग्नी

नतेत्तेतिहैवतत्रब्रूयात्॥ अथानंमाग्नेयंपंचकपालंउपा० सुयाजंच॥ तेनउपा० सुचरंती
८ तिवचनात्॥ ॥ उद्वैरुत्तमामनुयाजादिकरोति। उद्वैरुत्तममनुयाजंयजतीतिश्रुतेः। तद
दिसर्वमेवोद्वैरितिगम्यते॥ तथाच लिंगं। कृतकर्मवहिसत्तर्हि भवतिसर्वोहि कृतमनुबु
8 ध्यतइति॥ एवंप्राप्तेआह॥ ॥ उत्तमामनुयाजमेवोद्वैरुत्तममनुयाजंयजतीति॥ अथय
दुक्तंकृतकर्मेत्यादि॥ ॥ प्रयाजान्वसामान्यआज्यस्यकंतूवोसागीसादित्यग्निराम
स्यवेत्वितस्तन्मइत्येवमंतंसूत्रं॥ एवंअग्नज्ञजस्यवंत्विति एवमादिनिगमव्याख्या
तं॥ ॥ अथाज्यभागौ आख्यास्यतेइतिशेषः॥ ॥ अग्नि० सोमेनेत्याग्नेयस्यानुवा
क्या॥ ॥ अग्नआयू० षिपवसइतिद्वितीयस्याज्यभागस्यानुवाक्या॥ यदिपवमा
नोद्वितीयः॥ ॥ इंदुमतेच्चेदेयूनुत्रवाणितइतिद्वितीयेनुवाक्या॥ ॥ अग्निंतम राम
न्येसोम्भग्निरितिहविषोयाज्यानुवाक्ये॥ ॥ अग्नेतमद्याश्वमेइतिसंयाज्ये। स्विष्टकृ ८

संबंधिन्यौ याज्यानुवाक्ये ॥ छ ॥ अथानुयाजाः । अग्नेर्वसुवनेवसुधेयस्येत्येवमाद्यायाज्या
ज्याः पुनराधेयएवपाक्षिकी वशात्तदर्थमुच्यते अयंवांयजमानो मित्रावरुणा मित्र ८
ऋवेमित्रस्यचर्षणीधृतइति मैत्रावरुणाः । अयंवामिति च सौ याज्यानुवाक्ये मैत्रा
वरुणाः । क्रमेणवपायाहविराज्यादादायणपयस्याया याज्यानुकाक्ये ॥ पशुपु
रोडाशस्य मंडूकल्कतन्यायेनात्रापिचतुर्संचेव्याख्यास्यते ॥ हविषामित्यनुवर्त्त
ते ॥ छ ॥ अथातः काम्यप्रायश्चित्तेष्टीनां हौत्रं व्याख्यास्यत इति सूत्रशेषः ॥ छ ॥ अ
ग्निनाग्निः स ८ इध्यतेअग्निनेत्यग्निमन्ते ॥ छ ॥ उदुत्यंचित्रंदेवानामित्यग्नयेसूर्यवते
॥ छ ॥ तरणिर्विश्वदर्शतोवद्धयेति सूर्यायचज्योतिष्मते ॥ छ ॥ ज्योतिष्मंतंत्वाग्नेसंव
साथामितिज्योतिष्मते ॥ छ ॥ वत्स्याहिवेधोऽध्वनः आदेवानामपिपंथामगन्मेत्या
ग्नेपथिकृते ॥ छ ॥ त्वमग्नेव्रतपाअसियहोवप्रमिनामव्रतानीत्यग्नयेव्रतपतये

९ ॥छ॥ त्वमग्नेव्रतपदितिसोअग्नईजेशशामेचमर्त्तइतिअग्नयेव्रतभृते॥छ॥ पउदेनमुत्तरा
सिंद्रमंग्रतरामित्यग्नयेसंवर्गाय॥छ॥ वितेविषम्रातरन्तासइतित्वामग्नेमातुषी
रीडतइतिचाग्नयेविविचये॥छ॥ परस्पाअग्निरितिमानोअस्मिन्महाधनइतिअग्नयेअप्सु
चये॥छ॥ संवर्गाय॥छ॥ अप्स्वग्नेगर्भेत्रिस्पोषधीनामित्यग्नयेअप्सुमते॥छ॥ अग्निःशुचि
१ रुदग्नइत्यग्नयेशुचये॥छ॥ मरुतोयस्यहिक्षयेइत्यग्नयेमस्मानितिमारुतस्य॥छ॥ ह॥ अ
कंददग्निरुशिकावकइत्यग्नयेन्नामवते॥छ॥ अबोध्यग्निरुचोत्पामकवयइत्यग्न
येदात्रे॥छ॥ अयाभिश्चित्रस्त्रानारमिंत्रमितिइंद्रायप्रदात्रे॥छ॥ वषट्तेविष्णवासआ
कृणोमितन्मेसुचेति॥ किमित्तेविष्णवितिविष्णवेशिपिविष्टाय॥छ॥ उक्तेपार्थिवकृत्स्नः
॥वात्रेहन्मायशवसेसहदा॥ तुंपुरुहूतदिवंतमितींद्रायवृत्रघ्ने॥छ॥ वैश्वानरो राम
नऊतयेपृष्टोदिवीत्यग्नयेवैश्वानराय॥छ॥ यानोकशातन्नोवातइत्याश्विनस्य॥छ॥ ९

इंद्रःसुत्रामामातस्यवयमित्यैंद्रस्य॥❀॥अपिवाश्रायाग्नित्रेष्टीनां॰स्थानेतस्यदेवतायैपूर्णा
ऽतिंनुहुत्वादित्येतदास्थलायनकं॥अपिवेतिविकल्पार्थमुक्तं॥ततश्चपूर्णाहुतेरिष्टीनांच
तत्रतत्रविकल्पः॥७॥❀॥समानतंत्रमाग्रयणस्य॥कर्मार्थमिदमुच्यते॥❀॥नवतीपत्त्रश्चि
कीर्षयाइतरस्य।भानाशंकानिहत्यर्थो।सोप्यापेत्तयैवेत्सदोषः॥❀॥नववतीश्चिकीर्षन्पृ
थुपाजवस्योःस्थानेनववत्सोदधाति।(तल्लिंगाऋचःकर्तुमिछन्पृथक्पाजवस्योःस्थानेन
ववत्सोदधाति)।तल्लिंगाऋचःकर्तुमिछन्पृथक्पाजवस्योःस्थानेनववत्सोदधाति॥नवंचुस्तो
ममग्नयइतिएकांस्याहार्यस्येतिद्वितीयां॥❀॥अथाज्यभागौव्याख्यास्यतेइतिशेषः॥❀॥
अदाभ्यपुरइत्याग्नेयस्य॥❀॥नवस्यसोमनेवयमितिसोम्यस्य॥❀॥नव॰स्तोमंभ्रुवि
नःस्तोममितिचैंद्राग्न्यानुवाक्ये॥❀॥विश्वांदेवास्तर्पयतेतिएदंबर्हिःस्तुष्टरीमेतिच
वैश्वदेवस्य॥❀॥इमेनुद्यावापृथिवीइतिइमेधेनुरितिचद्यावापृथिवीयस्य॥❀॥घृतं

मिमिक्षे घृतवती भुवनानामित्याज्येनचेत्‌। द्यावापृथिवीयस्य॥ छ॥ नवस्यसोमहविश इति
१० नवऽ: स्तोमंस्तुच स्वन: सतुभिरितिच सौम्यस्य। यजिष्ठो हव्यवाहनस्त्वमग्नेदेवता प्योमा
गइतिसंयाज्ये॥८॥ छ॥ नववतीष्विकीर्णदिति जाबाल: पत्तांतरपरिग्रह हायेदमुक्तं॥ छ॥
नववतीरविकीर्षत: पूर्वोक्तोविधि: एष्वुपाजवत्यो भवंतइत्यर्थ: उक्तेऐंद्राग्नस्यादार्शकीया
न्यानुवाक्ये॥ छ॥ विश्वेदेवासआगतेतिविश्वेदेवा: शृणुतेममितिवैश्वदेवस्य॥ छ॥ महीद्यौ:
पृथ्वीचनइमंयज्ञंमिमिक्षतां पिपृतांनोभरीमभिरिति द्यावापृथिवीयस्य॥ छ॥ आप्यायस्वसमेतुत इतिसौम्यस्य। अस्य पूर्वोक्तविधि
नासंयाज्येविराजौवार्त्रघ्नावाज्यभागौ॥ छ॥ ऐंद्रसानसि॰ रयिमितिप्रससाहिषइतिसां
नाय्यस्य॥ छ॥ संन्नयेश्चेत्‌॥ छ॥ महांइंद्रोयओजसामहोइंद्रोनृवदितिमाहेंद्रश्चेत्‌॥ छ॥ आ
नोमित्रावरुणाप्रबाहवासिसृतमितिमैत्रावरुण्या: याज्यानुवाक्ये॥ छ॥ वाजिनस्यप्र राम
ज्ञोभवंतिप्रतुवाक्या॥ वाजेवाजउतियाज्या॥ छ॥ ऊर्द्ध्वजानुरासीनोनवानंवषट्करोति १०

॥अग्न्यत्रतिर्यङ्क्नान्तुः॥छ॥वाजिनस्याग्नेविहीत्यनुवषट्करोति॥निगदव्यातं॥८॥छ॥त्रैक्षात
व्याः सहस्रवंतावाज्यभागौ॥छ॥त्वमग्निर्बलभिर्बलंभित्वेत्याग्नेयस्यानुवाक्या॥छ॥त्रि
कः पवतइतिसोम्यस्य॥लिंगेनसहस्रवंनाविन्मकं॥छ॥उमाजिग्यथुर्नपराजयेथेइतिं
द्राविष्णू३०·ह्वितेतिचैंद्रावैष्णवस्य॥त्रीण्या—ठ·यीतिस्त्राग्निरस्मीतिसंयाज्ये॥छ॥तंनुतं
न्वंनिसंध्वाध्वमित्यग्नयेतंतुमते॥छ॥इडामग्नेअग्निंसुदीतिमितिचाग्नयेन्नादाय॥छ॥अ
ग्निरन्नादोन्नपतेन्नस्यनोधेहीत्यग्नयेन्नपतये॥छ॥अग्नआयूंषि·प्याद्युम्नानग्नइत्यग्नयेप
पुष्यते॥छ॥अश्यामतंवयंतइत्यग्नयेकामाय॥छ॥नमस्तेरुद्रमन्यवेपरिनोरुद्रस्यहे
तिरित्यग्नयेरुद्रवते॥२०॥छ॥अन्वारंभणीयायाः॥व्याख्याताःपतइतिसूत्रशेषः॥अग्नावि
ष्णूसजोषसेअग्नाविष्णूमहितद्धामेतिआग्नावैष्णवस्य॥पावकानसरस्वतीपावीरवीक
न्येतिचसरस्वत्याः॥छ॥पीपिवां०·स०·सरस्वतःदिव्यं०·सुपर्णमितिचसरस्वतः॥अत्रपंच

दशसामिधेन्यः॥ नहि कामेयं नापि प्रायश्चित्तेष्टिः॥❀॥ विनइंद्र मृगो न भीम इतींद्रायवि
११ मृध्वे॥❀॥ उक्ते आदित्येष्ट्याः आधाने॥ अनुवीघ्ययोरेतायाज्यानुवाक्यां॥❀॥ ऋतावानं
वैश्वानरं वैश्वानरस्य सुमनाविति वैश्वानरस्य॥❀॥ पर्जन्याय प्रगायतेति प्रवत्वा नावां
त्विति च पर्जन्यस्य॥ ॥ ॥❀॥ आ नारं त्वा तनूनामिति बृहस्पते अति यदर्य इति बार्हस्पत्यस्य:
॥❀॥ उक्ताः पंचबिलस्य॥ अवस्तादाग्नेयादीनां॥❀॥ नष्टवेददनीआख्याख्यास्यन इति शेषः:
॥ गुक्ते द्यावापृथ्वीवीयस्य॥❀॥ तव वायरब्बर्यं वष्ठकवा॰ स इति वायव्यस्य॥❀॥ उडुसं
चित्रं देवानामिति सौर्यस्य॥❀॥ सोमारुद्रयधारयेथामिति सोमारुद्रावुक्वमे तान्यस्मेति
च सोमारौद्रस्य॥❀॥ ब्रह्मजज्ञानं ब्रह्माणिमेमनयइति ब्रह्मवत्याः॥१२॥❀॥ इतिका
त्यायनीयहौत्रिकभाष्ये द्वितीयोध्यायः॥❀॥ राम॥ ॥ अथातश्चातुर्मास्यानां॥ हौत्रं राम
व्याख्यास्यत इति शेषः॥❀॥ उक्तौ वैश्वानरपार्जन्ययोः कुर्याच्चेत्॥❀॥ वैश्वदेवमासं २१

नेषुहवीःष्षूत्तरांवेदिमग्नीषोमपरेणाप्राङ्तिष्ठन्हिंकृत्यवाहिंकृत्यवाकल्याण्यावाचात्रयो
दशाग्निमंथनीयाअन्वाह॥वैश्वदेवपर्वण्यसन्नेषुहविःष्षूत्तरांवेदिमग्नीषोमपरेणाप्रा।
ङ्ति॰ष्ठन्हिंकृत्यहिंकृत्यवाकल्याण्यामधुरयावाचाग्निमंथनीयाऋचः त्रयोदशअन्वा
ह॥१॥छ॥अभित्वादेवसवितरित्येवमाद्याःयज्ञेनयज्ञमयजंतइत्येवमंताः॥२॥छ॥पंचम्या
अर्द्धर्चउपरमेत॥पंचम्याअर्धर्चेवसानेत॥छ॥जातायानुब्रूहीत्युक्तेउपसंतनोति॥अ
मयेजातायानुब्रूहीत्यध्वर्युणोक्तेततअर्धर्चेउपसंतनोति॥छ॥सप्तम्याअर्द्धर्चउपरमेत॥
सप्तम्याअर्द्धर्चउपसंतनोति॥छ॥प्रह्रीयमाणायानुब्रूहीत्युक्तेततोर्द्धर्चउपसंतननुया
त॥छ॥जातश्चेदनुगच्छेत्तस्याएवार्धर्चउपरमेत॥अथयद्यग्निर्जातोनानुगच्छेत्तस्यामेव
त्तनुगच्छेत्तस्याएवर्द्धर्चउपरमेत॥छ॥यदिपुनःसंप्रेष्येत्तद्यथासंप्रेषितमनुब्रूयात्॥पु
नःप्रैषसतियथासंप्रेषितमन्वाह॥छ॥नचेत्संप्रेष्येद्यावत्परिशिष्टमनुब्रूयात्॥असति

संप्रेषणोयत्परिशिष्टंतदेर्वनुब्रूयात्॥एतद्वश्रांत्यानुगतबुद्धौपुनर्दर्शीनेनभवति॥छ॥अ
१२ जायमानेरात्तोग्नीमरुचेअग्नीरत्ताॅसिसेधतीसाह॥तावत्स्यावज्ञातोग्निः॥जातेजात
प्रेषादि॥छ॥सप्तदशसामिधेन्यःभवंत्यत्र॥छ॥चतुर्थपंचमावंतरेणागंतवःप्रयाजा
12 भवंतीतिशेषः।तत्रचतुरोग्नेयग्न्याज्यस्यैत्यैवमाघायाज्याः॥छ॥वार्त्रघ्नावाज्यभागौ॥
अत्रवैश्वदेवपर्वणि।वार्त्रघ्नावाज्यभागौभवतः॥छ॥विराजौसंयाज्येप्रवत्तइतिशेषः
॥३॥छ॥अग्निर्मूर्द्धाभुवोयत्तस्यैत्याग्नेयस्य॥छ॥पावकाम्नयातेधामानीतिचसौम्य
स्य॥छ॥आविश्वदेवंयस्पत्यापामितिचसावित्रस्य॥छ॥पावकानसरस्वतीपावीर
वीतिचसारस्वतस्य॥छ॥पूषंतवमुक्तंतेअन्यदितिचपौष्णस्य॥छ॥इहेहवःस्वतवसइतिम
चित्रमर्कमितिस्वतवसस्य॥छ॥मरुतोयस्यहिक्षयेपूयमस्मानितिमारुतस्य॥पाति राम
कस्यभवतः॥छ॥विश्वेदेवासआगतविश्वेदेवाम्रणुतेममितिचवैश्वदेव्याःपयस्याया १२

॥ महीद्यौः ऋचन्नुषः पितेति द्यावापृथिवीयस्य ॥ छ ॥ त्वं सोम क्रतुभिरिति पत्नीसंयाजेषु
सौम्यस्य याज्या ॥ छ ॥ एतेन व्याख्यातौ वरुणप्रघासमहाहविषौ एतेन पर्वणोऽपरितने
ऽप्यपि पर्वणी व्याख्याते । एतद्धर्मके हि ते ॥ ४ ॥ छ ॥ अत्र विशेषोऽग्निं प्रणयिष्यञ्जघनेन गा
र्हपत्यं तूष्णीमन्वारभते तूष्णीं तृणं निरस्योपविशति । अग्निप्रणायनं करिष्यन् गार्हपत्यम
परेण तूष्णीमासनमालभ्य सदनात्तूष्णीमेव तृणं निरस्योपविशति ॥ छ ॥ अथ ऋचमनुब्रू
यादासीनः प्रथमां संव्रजन्नितराः व्रजमाणाः अष्ट ऋचम प्रतो ब्रूयात् ॥ शुनपा चतुर्थ्यां तत्र
प्रथमामासीनः उत्तराः संव्रजन्निति ॥ प्रदेवं देव्याधियेत्येवमादि । त्वं ह्यग्ने इत्येवमंता ॥ छ ॥ ५ ॥
चतुर्थ्यामर्द्धर्च उपरमेत्तूपरमः ॥ छ ॥ निधीयमानमग्निं हृष्टोपसंतनोति ॥ जातवेदो वे
निधीमहीत्यतमारभ्य ॥ छ ॥ ऐन्द्राग्नं ताना ॰ संचराणी प्रस्नानायाज्यानुवाक्याः ऐन्द्राग्न
स्य वद्दर्शे ॥ छ ॥ इमं मे त त्वेति वारुणस्य पयस्यायाः याज्यानुवाक्ये ॥ छ ॥ मरुतो यद्ध वो

दिवइतिमग्नाइखेदचरमाइतिमारुत्याः पयस्यायाज्यानुवाक्ये ॥ छ ॥ हिरण्यगर्भीयः प्राणा तइ
१३ तिकायस्यायाज्यानुवाक्ये ॥ ६ ॥ अवभृथेष्टिं चिकीर्षेत्तत्र चेष्टित्वादार्शफार्णमा
सिकविध्यंतप्रवृत्तौसत्यांइदमाह ॥ छ ॥ नसामिधेनीरनुब्रूयात् ॥ इध्मनाभावात् ॥ उ
ध्यमानानुवादित्वोहिताइति ॥ छ ॥ नावाहयेद्वचनात् ॥ होतृवरणंप्रवर्त्ततएव
वृतजपश्च ॥ छ ॥ अपबर्हिषःप्रयाजान्यजेत् ॥ वचनात् ॥ छ ॥ अप्सुमंतावाज्य
13
भागौ ॥ भवतइतिशेषः ॥ छ ॥ अप्स्वग्नेअप्सुमेसोमोअब्रवीदितिचानुवाक्येतयोः ॥
छ ॥ योवायजमानोब्रूयात् । तावाज्यभागौभवतः । सचायंविकल्पः ॥ छ ॥ इमंमेत
त्त्वेत्येककपालस्य । अत्रैककपालाभावात् ॥ निष्काषयागस्यएतेयाज्यानुवा
क्येइमंमेवरुणइतिपुरोनुवाक्या ॥ तत्त्वायामीतियाज्या ॥ छ ॥ अग्नीवरुणयोःस्त्वंन राम
सत्वंन्नइति ॥ याज्यानुवाक्ये ॥ ७ ॥ घृताहुत्याग्नेनाज्यभागमननुयाजं ॥ आज्यभाग १३

नुयाजवर्जं॥ षडेवाकृतयो भवंतीति प्रयाकृत्या॥ छ॥ सर्वमयनं दशाकृत्यत्तरं तयोरन्य तरत्कु
र्यात्॥ अनुवादमात्रं त्वेतत्॥ अथवा तयोरन्यतरत्कुर्यादिति यावदुक्तत्वंस्ताथ नेत
न्यत्र शंयोर्वाको न भवति॥ सूक्तवाकस्विष्टकृद्देवतासंकीर्तनवड्डवत्येव॥ छ॥ ९ आग्ने
नीकवत्याः॥ अनीकवत्तं मूनये सेनानीकेनेति च याज्यानुवाक्ये॥ अनीकवंतस्या॥ह
॥ छ॥ सांतपनीयायाः परोक्षप्रत्यक्षावाज्यभागौ॥ यउग्रइव शर्यहा अयं कतुरग्रभी
नइति चाज्यभागानुवाक्ये॥ यउग्रइव शर्यहेति परोक्षवचनं॥ अग्ने पुरोरुरोजिथेति
प्रत्यक्षमिवेति परोक्षप्रत्यक्षावित्युक्तं॥ छ॥ क्रीडनीयाश्चैतौ आज्यभावानुवाक्ये भ
वतः॥ छ॥ सांतपनाइदं हविरिति यो नो मरुतइति सांतपनीयस्य याज्यानुवाक्ये॥
छ॥ त्रिष्टुभावीडितवत्यौ संयाज्ये॥ त्वामीडते अजिरमितिअग्निंस्तु दीतिमिति च॥ छ॥
क्रीडनीयापाश्चैते भवतः॥ ८॥ छ॥ अथातो गृहमेधीयायाः होत्रं वक्ष्याम इति शेषः॥ छ॥

तूष्णीमन्वारमते॥ तूष्णीं तृणं निरस्योपविशति॥ तूष्णीमेवात्मानमालभते॥ तूष्णीमेव होतृ
 षदनात्तृणं निरस्यति॥ न सामिधेनीर्नावाहयेन्न प्रयाजानयजति नानुयाजान्॥ स्विष्टकृ
तिन निगदं ब्रूयात् प्रतिषेधवचनसामर्थ्यात्॥ ॐ॥ एवमेतास्विष्टिषु यास्तु नावाहनं
 क्रियत इत्यैतरेयकं। एवमावाहनं न क्रियते॥ यास्तु स्विष्टिषु निगदं न ब्रूयात्॥ यथा
त्र्यवमस्थादौ। ऐतरेयकमेतद्वचनं॥ ॐ॥ पुष्टिमंतावाज्यभागौ। अग्निनारयिंगयस्फा
नोअमीवहेति॥ ॐ॥ शुनासीरीयस्य चैतौ॥ आज्यभागौ भवतः॥ ॐ॥ गृहमेधास आ
गत प्रबुध्न्या व ईरत इति च याज्यानुवाक्ये गृहमेधीयस्य॥ ॐ॥ अनुष्टुभौ चित्रवत्यौ स
यातां। त्वां चित्रश्रवस्तम यद्वाहिष्ठमिति च॥ ॐ॥ शुनासीरीयस्य चैते॥ याज्यानुवाक्ये
भवतः॥ २०॥ ॐ॥ क्रीडिनीयस्य याः क्रीडं वः शर्धो मारुतमिति। अन्यासो न ये मरुत इति च या राम
ज्यानुवाक्ये प्रधानस्य॥ ॐ॥ आदित्यासंत्रमप्याधेयेभ्याख्यातमसमानबर्हिर्विचेत्॥ य 

दासमानबर्हिंषित्वदाग्न्यस्याग्न्याधेयेतंत्रमुक्तंसमानबर्हिंषितत्तंत्रंनभवति॥ पंचदशे
वसापिवेत्यः॥ परोक्तस्रग्न्यन्नावाज्यभागौ त्रिष्टुभावीडितवत्यौ संयाज्ये। मुख्यक्रमान्तु
ग्रहात्॥ हौत्रकाराभिप्रायेणपात्रिकस्तत्रक्रमः इतिकात्यायेन॥छ॥ मा हा हविषिम
हेंद्रोनानांसंचराणांप्रज्ञानांयाज्यानुवाक्याः॥छ॥ विश्वकर्मन्हविषावर्धनेत्धामानी
निवैश्वकर्मणः॥छ॥२१॥छ॥ अथातःपितृयज्ञेसामिधेनीभ्यउपतिष्ठते। संचरेणाग्न्य
विश्यपश्चिमांवेदिश्रोणिंश्वैणादक्षिणाग्निमभिमुखस्तिष्ठतीत्यर्थः॥छ॥ नमःक्रंदा
युत्सीदत्तिग्माधिकारात्॥ वचनसामर्थ्यात्॥छ॥ हिंकृत्याशंतस्त्वेत्येतामेवत्रिरनु
ब्रूयात्॥ हिंकारंकृत्वाउशंतस्त्वेत्येतामेवैकामृचंत्रिरनुब्रूयात्॥ सोन्वाहोशंतस्त्वा
निधीमह्युशंतःसमिधीमहीत्यादिप्रकृतत्वात्॥छ॥ अनवानेसकृत्सकृदनूच्यातेम
एवंदधाति॥ अनवानेविधिविशेषोयं। यतःप्राणेवविधेयंगत्वादेवप्राप्तेः॥छ॥ अ

वहदेवानग्नित्यजमानायेत्याह॥ ७॥ यथानुपूर्व्यमावाहयति। चोदनाक्रमेणोत्पर्थः अथ
२५ ग्निमावाहसोममावह। पितॄन्सोमवतआवह पितॄन्बर्हिषदआवह पितॄनग्निष्वात्ताना
वहदेवांआज्यपांआवहाग्निं होत्रायावहेतिश्रुतत्वात्॥ ७॥ उत्सीदमार्षेयं नोच्चा
15 र्यंतत्रउत्पर्थः॥ ७॥ स्कंदतिस्वंमहिमानमावहेत्येवं न भवति॥ ७॥ यत्रचसंयजति॥
यत्रस्वंमहिमानमितिअस्यनिवृत्तिः संयाज्याशब्देन स्विष्टकृदभिधीयते॥ ७॥ प्रव
त्तजपाद्युत्सीदंति प्राकृतस्रुगादापनात्॥ एतत्वादेवसवितरितिप्रवृत्तजपः॥ तदाद्य
त्सीदति। अग्निर्होतेतिस्रुगादापनं च पूर्ववत्सर्वं॥ ७॥ तूष्णीमन्वारभ्यतेतूष्णीमुत
त्तं निरस्योपविशति॥ तूष्णीमेवहोतान्वानमालभेत्॥ तूष्णीमेवहोतृषदनात्तृणंनि
रस्योपविशति॥ ७॥ उपबर्हिषः प्रयाजानुयाजान्यजेत्॥ सोपबर्हिषः श्चतुरः प्रया राम
जान्यजतीतिश्रुतेः॥ सोपबर्हिषो द्वावनुयाजौ यजतीति च॥ ७॥ जीववंतावान्यभा २५

गो॥ छ ॥ आ तो अग्ने सुचेतुनेत्याग्नेयस्या॥ छ ॥ त्वं च सोम नो वशऽइति सोम्यस्या॥ छ ॥ उदीरता
मंगिरसो नऽइति च नाना प्रत्यावेदेऽग्ने न्व्सस्य हि पुरोनुवाक्ये अन्वाहैकया वै देवान्प्र
च्यावयंति ह्याथ पितॄनिति श्रुतम् तस्मात् द्वे पुरोनुवाक्ये अन्वाहेति श्रुतत्वात्॥ येनःपू
र्वे पितरऽइत्यनया सोमवतः पितॄन्यजेत॥ छ ॥ त्वं सोमेति सोमाय चेत्पितृमते सो
मश्चेत्पितृमान्भवति। नदा त्वं सोमेत्यनया यजेत॥ छ ॥ बर्हिषदः पितरऽइति बर्हिष
दः। यजेदिति शेषः॥ तत्र श्वायं बर्हिर्लिंग केत्र द्वे अनुवाक्ये॥ एका याज्या॥ छ ॥ अग्नि
ष्वात्ताः पितरऽइत्यग्निष्वात्तान्यजतीति शेषः। तत्राप्येवमेव॥ छ ॥ यमग्ने कव्यवाहनेत
ग्निं कव्यवाहनं। यजेतेन पूर्वं यजतीति शेषः॥ छ ॥ अवांतरेजं बर्हिषि प्रास्यति न चेदी
जं प्राश्नीयुः। इडायाः प्राशनपक्षे अवांतरेजं बर्हिषि प्रास्यति॥ छ ॥ न सूक्तके नामादि
शति॥ सूक्तवाके यजमाननामादेशो न भवति॥ छ ॥ शंयोरंतं संतिष्ठति पितृयज्ञकर्म

॥२१॥छ॥शुनासीरीयेसंचराणांप्रज्ञानायाज्यानुवाक्याः॥निगदव्याख्याता॥छ॥शुनासीरावि
१६ मां वाचमितिशुनं॰ सुफालाइतिचशुनासीरीयस्य॥छ॥शुनासीरंपुरंदरमितिशुनं॰
ह्वेमेतिचेंद्रायचेतरशुनासीराय॥छ॥नववायवपर्यर्थवश्चरुवा॰ सइतिवायव्यस
॥छ॥उदुत्यंचित्रंदेवानामितिसौर्यस्य॥छ॥ ॥इतिहौत्रिकस्यकर्कभाष्येतृतीयोध्या
16 यः॥२७॥ ॥अथातःपशुबंधे॥हौत्रंव्याख्यास्यामीतिशेषः॥अग्निप्रणयनंवरुण
प्रघासवत्॥भवति॥छ॥आसीनोयोग्यंसप्तर्वमनुब्रूयात्॥अंजंतित्वामध्वरेदेवयंत
इत्येवमादि॥अत्रविभागमाह॥१॥छ॥यूपायाज्यमानायानुब्रूहीत्यक्तेप्रथमां॥अत्र
चक्रगणत्वात्त्रिरावृत्तिःप्राप्नोति॥तत्रतृतीयावृत्तौअर्द्धर्चेवस्येत्॥प्रणवेनार्द्धर्चशः
संदध्यादित्यर्थः॥छ॥उच्छ्रीयमाणायानुब्रूह्यत्यक्तेद्वितीयादिप्राकृसप्तम्याः॥तच्चप्र राम
यमार्द्धर्चादारभ्यपर्यार्द्धर्चे॰वसानं॥परिवीयमाणायानुब्रूहीत्यक्तेउत्तमांतदपिप १६

ष्यईर्चादि। एवंहि प्रणवे ऋचां संधानं कृतं भवति॥ ४॥ यथोक्तं प्रेथनीयाः मंथनं वैश्वदेवव
द्भवति॥ ५॥ सप्तदश सामिधेन्यो वार्त्रघ्नावाज्यभागौ। विराजौ संयाज्ये॥ ऋतुप्रत्यपत्वे॥
६॥ राष्ट्रा॰ सीत्सं ऐंचानावसंए चानो नन्वइति म्र त्वा मित्रावरुणयोस्त्वा बाहुभ्यां प्रश
स्त्राप्रशिखा प्रतिगृह्णाम्यवक्त्रो विधुरो भूयासमूर्जस्वन्मा मा हि॰ सीरिति तमेवंदं
ण्डनेन मंत्रेण॥ नोपस्पृशेदात्मानं॥ ७॥ तेनाप्रथमप्रयाजात्॥ ८॥ जुष्टो वाच इति
प्रवृत्तहोमो कृत्वां ननेरेण होतारं गत्वा दक्षिणां वेदिश्रोणिमपरेण प्राङ्मुखस्तिष्ठन् संप्रैष
माकांक्षेत्॥ जुष्टो वाच इति मंत्राभ्यां प्रवृत्तहोमौ कृत्वा होतारमंतरेण गत्वा दक्षिणां वेदि
श्रोणिमपरेण प्राङ्मुखः प्रह्वो॰ वनतः स्थित्वध्वर्योः सकाशात् प्रयाजप्रैषमाकांक्षेत
॥ प्रपेन्नेत्पर्धः॥ ९॥ समिधः प्रेष्येत्युक्तेऽध्वर्युणा मैत्रावरुणः प्रतिपद्यते॥ १०॥ हो
तायक्षदग्निं समिधा सुसमिधा इत्येवमादि यावत्स्वाहाकृति प्रैषः॥ एभिरेकादशभिः प्रैष्य

न्तिमैत्रावरुणोहोतारं ॥ छ ॥ ३ ॥ समिधोग्नआज्यस्येतावनीभिराग्नीध्रियजेत् ॥ होताप्रेषितःप्रे
१७ षितः ॥ छ ॥ वामस्यगोपा । स्यात् । अमूरो । देवेभ्यो ॥ भिप्रायंतां । कृणवोने । प्रचेतसा । तस्यतां
। यशोधां ॥ नरोहव्यसूक्तीनामितिचप्रयाजेष्ववस्येत् ॥ एवंस्थानेषुप्रयाजेष्ववस्येत्
॥ छ ॥ दशांतेपर्यग्न्येयेनुब्रूहीत्यक्तेपर्यग्निकरणीयंत्वचमन्वाह ॥ अग्निर्होतानोअध्व
रेत्येवमादि ॥ छ ॥ उपप्रेष्यहोतर्हव्यादेवेभ्यइतिप्रत्वाध्वर्योःसकाशात् । अजेदग्नि
रसनद्वाजेत्रिदेवोदेवेभ्यइत्याह ॥ मैत्रावरुणः ॥ छ ॥ दैव्याःशमितारआरभध्वमुतमि
त्येवमाद्याह होतालघदुःकृतमन्यत्रतदित्येवमंतं ॥ छ ॥ अस्नारक्षःसंसृजतादित्येव
मादिश्राभिगा ३ उ ३ इत्येवमंतंत्रिरनुब्रूयात्शेषमुपांशु ॥ छ ॥ स्तोकेभ्योनुब्रूहीत्यक्ते
स्तोकंघस्रचमनुब्रूयात्मैत्रावरुणः ॥ छ ॥ जुषस्वसप्रथस्तममित्येवमादिदे राम
वशोविहीत्येवमंतं ॥ छ ॥ उत्तमेनप्रयाजेनप्रचर्याग्न्याग्नाज्यभागांतेकृत्वा ॥ छ ॥ आ १७

17

ग्नेयमाज्यभागे होता यक्षदग्निमाज्यस्य जुषतां हविर्होतर्यज ॥ छ ॥ आग्न्याज्याया एष भ
वति ॥ छ ॥ एवं सर्वत्र यथाऽऽद्यदेवतं ॥ छ ॥ होता यक्षत्सोममाज्यस्य जुषतां हविर्हो
तर्यज ॥ इति विशेषो वनस्पति हविषि स्विष्टकृति च त्रिषु स्तुवत्रभवतीति शेषः ॥ ६ ॥ छ ॥
आ वृत्रहणा वृत्रहभिः ॥ शुचिं नु स्तोममिति वपायाः याज्यानुवाक्ये ॥ छ ॥ जातवेदो व
पाया गच्छेत्येवमादिभिः ॥ स्वाहाकारं नैर्वपाया होमं जुहोति ॥ छ ॥ आ भरतं शिक्ष
तं गीर्भिर्विप्र इति पुरोडाशस्य ॥ याज्यानुवाक्ये ॥ छ ॥ इडामग्ने अग्निं स्तुदीतिमित्यनि
रुक्तस्य याज्यानुवाक्ये ॥ अनिरुक्त इति पुरोडाशस्विष्टकृदुक्तं ॥ छ ॥ मनोतायै हविषो
वदीयमानस्यानुब्रूहीत्युक्ते मनोतां सूक्तं त्रयोदशर्चमनुब्रूयात् ॥ ७ ॥ त्वं ह्य
ग्ने प्रथमो मनोता इत्यादि ॥ वसु विधते राजनित्वमित्येवमंतं ॥ ८ ॥ छ ॥ अमावां प्रचर्ष
णीति च याज्यानुवाक्ये याज्यायामर्धर्चे उपरमेत् ॥ आवसा होमात् ॥ निगदव्याख्या

१८

18

नां॥ छ॥ देवेभ्यो वनस्पत इति च वनस्पतेस्थानयानि सूयेति याज्यानुवाको॥ ९॥ छ॥ अथानु
याजाः व्याख्यायंत इति॥ शेषः॥ छ॥ देवं बर्हिः सुदेवं देवैः स्यादित्येवमादि देवो अग्निः स्विष्टकृ
दित्येवमंताः॥ छ॥ १॥ एतेषामेमाद्यं नैर्यजेत्॥ द्वयोस्तु विशेषः॥ छ॥ द्विपदेरादि भिस्त्रियदे
रंतैर्वसुवनादिभिर्दशमषष्ठयोस्त्रिपदं चतुष्पदं तु सप्तमस्य। दशमषष्ठयोः त्रिपदमादि
कुर्यात्॥ चतुष्पदं तु सप्तमस्य॥ शेषाणाम नुक्रमेव॥ छ॥ उत्तमं तु व्रतत्ने सुभावत्तु ध्रुवा
नां॥ अधस्तनपरिभाषाय वादोयं॥ उभयोश्च याज्या॥ उभयग्रहणात्॥ छ॥ अग्निमघे तिसू
क्तवाकप्रैषः॥ निगदोक्तं॥ छ॥ सह शंय्योर्वा कमनुब्रूतः॥ क्वच नान्॥ छ॥ तदंते मैत्रावरु
णो दंडमाहवनीयांग्रादध्यात्॥ शंय्योर्वाकांते मैत्रावरुण एव दंडमाहवनीये प्रत्तिपेत्
॥ छ॥ हुत्वा वस्रथा द्वदेत्य प्रहार्येग्नौ समिदाधानं करोति॥ प्रहार्यमिति प्रणीतः॥ छ॥ पर्यग्नि राम
करणायाः स्तोकं मनोतां सूक्तमनुवाक्याः प्रैषाश्च मैत्रावरुणस्य॥ अतोन्यद्धोतुः कर्त १८

ग्नस्याच्च॥छ॥उभौकुवीतामितिदेवसूतु:॥आचार्यआह॥अध्वर्युहृदयंहोतृमैत्रावरुणौकु
वीतेति॥नप्रैषिनाविसर्पर्थः॥११॥राम॥इतीश्रीककौपाध्यायकृतौहौत्रिकभाष्येचतुर्थो
ध्याय:॥छ॥श्री॥पशुबंधान्व्याख्यास्याम:॥इतिप्रतिज्ञा॥छ॥सर्वेषांपशूनांप्राकृताःप्र
याजानुयाजप्रैषा:॥प्राकृताग्नीषोमीयसूक्ता:येतेसूक्तानिरूढउपनिबद्धा:तेऽन्वय
साम्ना:सर्वेषांपशूनांभवंति॥छ॥आप्रियश्चसौत्रामणीवर्जं॥आप्रिय:प्रयाजयाज्या
स्ताश्चप्राकृत्य:सौत्रामणींवर्जयित्वा॥तत्रहिप्रत्यक्षाम्नानं॥छ॥एष्ठकूप्रयोगिणांचै
न्द्रवायोधसयो:एषकूप्रयोगीणांचैंद्रवायोधसेवर्जयित्वाप्राकृताभवंति॥तत्रापिस
म्नानमस्तिलिंगेनेति॥एवंप्राप्तेआह॥छ॥सर्वत्राविरोधात्॥सर्वत्रैवप्रवर्त्तंतेप्राकृ
ता:नहितेषांप्राप्तवतांविरोध:॥यदिऐंद्रवायोधससंनिधानेपठ्येरन्॥ततःप्राकृतानां
विरोधस्यात्॥नतुतत्संनिधौपाठः॥तस्मादविरोधएव॥एवंस्थितमाह॥छ॥नप्रकृतिद

र्शनात्॥ ऐंद्रवायोधसौ प्रकृत्यैषा ऽप्रीणां खिलेषु दर्शनं भवति॥ तल्लिंगा हि ऋचः॥ अत्रापि
१९ यश्चतत्र पठ्यंते॥ न तु लिंगं हि प्रकरणस्थस्य विनियोजकं भवति॥ नाप्रकरणस्थस्य॥ स
न्मेन देवा॥ आम्नानानानर्थक्यं मा भूदित्यप्रकरणस्थस्यापि विनियोग इष्यते॥ लिंगेने
19 ति॥ अतश्च तदृग्नमपि प्राकृताः॥ अपरे तु विकल्पमेवेच्छंति ऐंद्रवायोधसयोः प्राकृतत्वा
भवंति ऐंद्रवायोधसौ वा॥ न हि तत्प्रकरणगतं लिंगमेतदन्यत्र पाठात्॥ तस्मात्प्राकृ
तावा भवंतु॥ ऐंद्रवायोधसौ विति एवं च कातीयसूत्रे ऐंद्राग्ने के प्रथमस्य वायोधसा
नुत्तमस्येति॥ छ॥ समानमन्यत्॥ यदन्यत्तत्समानं॥ तुल्यं भवतीत्यर्थः॥ न हि विशेष॥
स्तस्मात्साधूक्तं समानमन्यत्॥ अतो यथादेवतं च पाशुरोडाशपशूनां षड्डचच्यंते
॥ छ॥ चतुर्त्रैचं व्याख्यातं हविषां॥ यत्र प्रदेशांतरे देवतानां त्र्यचो व्याख्याताः॥ तत्र चतुर्त्रै राम
चं व्याख्यानं॥ छ॥ पाशुकेषु तावत्स्वैश्वदेवे॥ स पाशुकेषु चातुर्मास्येषु वैश्वदेवेप १९

वीणिविश्वेदेवाअरनाटघइत्येवमादिचतस्रअर्चो भवंति॥छ॥वरुणायाहिनोअघइत्ये
वमादिकमचनस्योवारुणाय:॥१॥महांइंद्रोवज्रहस्तइत्येवमादिचतस्रएवर्च:माहेंद्रस्य॥९
॥शुनासीरासचेतसेत्येवमादिचतस्रएवर्च:शुनासीरीयस्य॥९॥शुनासीरंपुरंदरइ
त्येवमादिचतस्रएवअर्च:इंद्रश्चैवशुनासीरोदेवताछ॥२॥उपप्रयंतोविज्ञातेअग्निस्तिग्मे
नत्वामग्नेपुष्करादिसेमाग्नेयस्य॥छ॥विष्णो:कर्माणिइरावतीतिहिष्णोविष्णोर्नुकमितिवै
ष्णवस्य॥छ॥निद्धुत्वांन्वायवितिचतस्रोवायवस्य॥छ॥वणमहांअसीतिचतस्र:सौर्य
स्य॥छ॥आमंद्रैरिंद्रेहरीद्रगेगमन्नेवेदीद्रमित्यैंद्रस्य॥छ॥यस्येमेइतिहेमामहि० सीत्प्रजा
पतेनेतिप्राजापत्यस्य॥छ॥सोमोधेनुम्मितितिस्रस्त्व० सोमक्रतुम्मिरितिसौम्यस्य॥छ॥
आतेअश्वपामतंतुभ्यंतावयंतइत्यग्नीनांकामाय॥छ॥मरुत:पृश्निमातरइतिमारुतस्य
॥छ॥व्याख्याता:भूतस्यइतिशेष:॥छ॥यस्यदेवतायेषद्रूचंनविंदेत्॥छ॥विकल्पेनाग्नेयी

हौत्र. भिरैंद्रिभिर्वैश्वदेवीभिर्वायजेततनाम्नाभ्यां वा। यद्दचोऽसंविज्ञो सत्यां विकल्पेनाग्नेयीभि
२. र्यजेत। ऐंद्रीभिर्वानाम्नाभ्यां वा॥ छ॥ आयाहियियत्तमूतयइति एवमादि॥ छ॥ काम्यानां यां
कामयते देवतां यज्ञभागिनीं तामाहूय यजेत॥ छ॥ सास्य देवतेष्टा प्रीता तं कामं समर्ध
20 यति यत्कामो यजत इति हि ब्राह्मणं॥ काम्यासु सर्वासु विकल्पेन देवतानां तत्र विधानमेत
त॥ ततश्च देवब्रह्मवर्चसकामः सौर्यः अग्निरपि भवतीन्द्रो चेति। सास्य देवतेष्टेत्यर्थवादः॥ छ
अववतीं वीरवतीं पुरस्ताल्लक्षणाः गायत्री पुरोनुवाक्या॥ अवशब्दवती वीरवती विक्रांतार्
थाभिधानवती अवशब्देन च तदार्थाभिधानं॥ ततश्च पर्यायशब्दस्यापि प्राप्तिः॥ एवं विक्रां
नशब्देनापि। पुरस्तादेव प्राग्भागे लक्षणं यस्याः गायत्रीछंदसा पुरोनुवाक्या॥ छ॥ अववती
वीरवती उपोत्तमवत्सुपरिष्टात्त्रिष्टुब्याज्या॥ याकामवती पंक्त्यावपर्वेगतः उपरिष्टाल्लक्षण राम
प्रदालुपरिष्टभागे वा याज्येति याज्याकृतिः॥ साहत्वेवसमृद्धानुवाक्यायस्यै प्रथमात्यदा २.

वतामग्निर्व्याहरतिसोऽएवसम्प्रैषायाज्यायस्याऽनमात्यदाइदेवतायाअधिवषट्करोति।त
याच।पुरस्ताल्लक्षणानुवाक्यास्यात्॥अथयोपरिष्टाल्लक्षणासायाज्यास्यात्॥छ॥देव
तालक्षणाचेतिभार्गवः॥देवतालक्षणेवायाज्यानुवाक्येभवतः॥भार्गवोनेन॥छ॥विलंबि
तंतिष्ठन्पुरोनुवाक्यांब्रूयात्॥छ॥आसीनोऽनुतंवाज्यां॥एवंहिश्रूयते॥अत्रंखद्यंनिवै
वानुवाक्यामनुब्रूयात्॥त्रिभएववयाज्ययात्वरेतइतिच॥तथासामिधेन्यनुवचनेनेति
ष्ठतिक्रियांदर्शतीतिष्ठतीक्रियामेवानुवाक्यायांदर्शयति॥सवैतिष्ठंनन्वाहस्वेतदसौह्य
नुवाक्यान्वासावैवैतद्भूत्वानदहेति।अपरेतुनवर्णयंति॥मैत्रावरुणस्यानुवाक्या
वचनेप्युरव्यातिष्ठतिक्रियाविहितभादान्ननतइत्येतस्यकेचिदिहसूत्रेतिष्ठतानुपहते
वतस्मादासीनस्यैवानुवाक्यापिचहोताहोतृषदनेमंत्रवचनयतंदोषतिष्ठातथोपवे

कर्क. शन्नइतिएषसर्वार्थस्यैवासीनस्यैवानुब्रूयादितिविशेषः॥ ६॥ चोदितोनुब्रूहितिपुरोनुवा-
२१ क्यांयजेत्यक्तोयाज्यां॥ ७॥ येयजामहइत्यादितोयाज्यायाः कुर्यात्॥ वचनात्॥ ८॥
अग्नादिशेच्चदेवतामन्यत्रसंप्रैषेभ्यः॥ चशब्दाद्याज्यादावेवान्यत्रसंप्रैषेभ्यइतिविशेषः
21 ॥ ९॥ उपोद्धरतियेयजामहेअनुयाजेभ्यः॥ अनुयाजेषुयेयजामहोनभवति॥ सएषस
प्तदशप्रजापतिः॥ पत्नीत्वपनिरितियत्कमंतंप्राप्तावहमाननुयाज्येयजामहंकरोती-
त्याह॥ १०॥ प्रणवांताःपुरोनुवाक्याः॥ ११॥ वषट्कारांताया ज्याभवनीतिविशेषः॥ प्रणव
वषट्कारयोरेका॰ऋतिंकुर्यात्॥ सउभयोरेक॰ध्येकतानेनेत्यर्थः॥ १२॥ उच्चैस्तरांवा
वषट्कारंकुर्यात्॥ १३॥ शेषवचनसामर्थ्यात्॥ १४॥ यदिजायांपुरोनुवाक्यांवानविंदेत् राम
व्याहृतिमेवयाज्यानुवाक्यास्थानेकुर्यात्॥ साचैकैवकर्त्तव्या॥ वाक्यभेदात्॥ नसर्वाः २१

॥छ॥ अन्यतरा यवर्चौ मेयं कुर्यात्॥ एवमपि स्रूयते॥ छ॥ देवपात्रं ठ· हवै याज्यापुरोनुवा-
क्या पिबन्ति ह वा अन्योन्यस्य पात्रेण देवाः अतउच्यते॥ छ॥ अथो अग्न्याग्नेयीभ्यां यजे-
नाथो ऐंद्रीभ्यां अथो वैश्वदेवीभ्यां॥ अस्य विधेरर्थवादः॥ देवपात्रं ठ· हवै याज्यापुरोनु-
वाक्या चेति॥ छ॥ हैत्वेकछंदसी याज्यापुरोनुवाक्या सुपरिजिहीर्षेद्द्वार्हडुस्नौ छंदसी
वा ते भवतः। याज्यानुवाक्याश्च वशब्दाद्द्वयमेवापरिहरेत्॥ बार्हतमेवोष्णिहं च। सछंदसी वा
ते भवतः। समानछंदस्के भवत इति स्मार्थत्वेच॥ छ॥ ज्यायः छंदो न्यूचा कनीयसा यजेत॥
तथा ज्यायसीमनुवाक्यां। अनूच्य कनीयसीं याज्यामनुब्रूयादित्यर्थः॥ छ॥ डपा ठ· स्रु
देवत्य पुरोनुवाक्या सुपदां तेचोपरम्य प्राणासंततमुक्त्वैः प्राणा वं कुर्यात्॥ यावद्दुपां स्रुदे
वत्य पुरोनुवाक्या तास्वत्यपदां तेउपरम्य प्राणासंततमनुमुद्द्रू संतो श्वासेन प्राणा वं कुर्या

न्॥ छ॥ याज्यास्तुपदांतेनोपरम्यप्राणसंततमुच्चैः वषट्कारंकरोति॥ याज्यायामेवप्राण
वस्थानेवषट्करोतीतिशेषः॥ छ॥ वषट्कारानुमंत्रणं॥ छ॥ वषट्कारमामस्राद्युःप्रमोषीर्वा
गोजःसहोजोमयिप्राणापानौपात्मिति॥ वागितिवा॥ अनुमंत्रणं॥ वषट्कृत्यवषट्कृत्यानु
मंत्रयेत। आत्मानंचालभेत। इतिनिगदव्याख्यातंप्राणववषट्काराणामाद्यानिष्कवंते॥ प्र
णवेवषट्कारस्वयदाद्यंतस्यप्लुतिर्भवति॥ छ॥ येयजामहेब्रूहिप्रेष्यश्रावयश्रौषडवौवहे
त्येतेषामाद्यानिविहीतिद्वितीयमक्षरंप्लवते॥ छ॥ याज्यांताश्च॥ प्लवंतइतिवर्तते॥ छ॥
वषट्कारेतस्मिन्संध्यक्षराण्यप्रगृह्यसानिकांतचवषट्कारेणायट्कृता याज्यांतेयानिसं
ध्यक्षराण्यप्रतिषिद्धाणि। ईदूदेद्विवचनंप्रगृह्यमितिप्राद्विवचनांतानिसंध्यक्षराणि। कु
तएतत्। इत्येवमादिनिएतेषांविवेकेनप्लुतिर्भवतियथातिवर्त्तमानाऊवौषडिति

कर्क. आईआकुइतिप्लुतभावेनदर्शनमेतत्॥ छ॥ पुरोनुवाक्यानांप्रणवेत्यस्याचरस्य स्वरप्रभृ
२३ तिप्रणवलोपः॥ पुरोनुवाक्यानांपदेस्वरस्वरंतस्यप्रणवेपरत्रावस्थितेस्वरप्रभृतिप्लुथतं
नोप्लुयतइत्यर्थः। यथाइंद्रायदक्षरींद्रियमिति। अछंदस्य॥ छ॥ प्लुतस्वरविवृतंप्रणवेनो
23 च्चारयेत्। तदंत्यमप्लुतस्वरंअष्टधागमृतप्रणवेनोच्चारयेत्॥ यथेंद्रायदक्षरिति॥ छ॥ के
गाणेषुचैवं॥ प्रणवेपरत्रावस्थितेस्वरप्रभृतिप्लुप्रतेत्याचरं॥ प्लुतस्यस्वरंचाष्टधागमृतप्र
णवेनोच्चारयेत्॥ ८॥ छ॥ राम॥ छ॥ ॥ इतिश्रीककौपाध्यायकृतौहोत्रकपरिशिष्टभा
ष्येपंचमोध्यायः॥ ॥ छ॥ ❀॥ श्लोकसंख्या॥ ४८८॥ ॥ शुभमस्तु॥ ॥ छ॥ ॥

राम
२३